शोध मंथन, Impact Factor 5.463 (SJIF), UGC No. 40908 ISSN: (P): 0976-5255, (e) : 2454-339X,
Vol. 9, Issue 3, pp (317-320), Month: Sep. 2018 

# श्रीमद्भागवते अर्थचिन्तनम्

**डॉ० नरेन्द्रकुमारः**
सहायकाचार्य (संस्कृतविभागे)
चौधरीचरणसिंहविश्वविद्यालये, मेरठे

**डॉ० सन्तोषकुमारीः**
सहायकाचार्य (संस्कृतविभागे)
चौरीचरणसिंहविश्वविद्यालये, मेरठे

---

*धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।*
*धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्।।*[1]
*इत्थं धर्मस्य दशरूपाणि स्वीकरोति मनुः।*

श्रीमद्भागवतकारमतानुसारं त्रिंशद् रूपधरोऽयं धर्मः। नारदः नारायणमुखाच्छ्रुतं सनातनं धर्ममुपदिशति युधिश्ठिरम्।

*नत्वा भगवतेऽजाय लोकानां धर्महेतवे।*
*वक्ष्ये सनातनं धर्मं नारायणमुखाच्छ्रुतम्।।*
*सत्यं दया तपः शौचं तितिक्षेक्षा शमोदयः।*
*अहिंसा ब्रह्मचर्यं च त्यागः स्वाध्याय आर्जवम्।।*
*सन्तोशः समहक् सेवा ग्राम्येहोपरमः शनैः।*
*नृणां विपर्ययेहेक्षा मौनमात्मविमर्शनम्।।*
*अन्नाद्यादेः संविभागो भूतेभ्यन्ध यथार्हतः।*
*तेष्वात्मबुद्धिः सुतरां नषु पाण्डव।।*
*श्रवणं कीर्तनं चास्य स्मरणं महतां गतेः।*
*सेवेज्यावनतिर्दास्यं सख्यमात्मसमर्पणम्।।*
*नृणामयं परो धर्मः सर्वेशां समुदाहृतः।*
*त्रिंशल्लक्षणवान्राजन्सर्वात्मा येन तुश्यति।।*[2]

धारणार्थक–धृङ्–धातोरौणादिके मन् प्रत्यये कृते धर्मशब्दो निश्पद्यते। अतएव **'धारणाद्धर्ममित्याहुः'** इति निगदितं महाभारते। अभ्युदयनिःश्रेयससिद्धि कारणमयं धर्म आचरणीयः। धर्मस्थानेषु पुराणमन्यतमं तत्रापि श्रीमद्भागवतं परं प्रसिद्धम्।

सत्यं शिवं सुन्दरमिति समन्वितं नैतिकादर्शमनुपालयन्नेव नरः अभ्युदय निःश्रेयसमाप्नोति। यतोऽभ्युदयनिः श्रेयस सिद्धिः स धर्मः।[3] धर्म–अर्थ–काम–मोक्ष इति पुरुषार्थ चतुश्टयस्य सिद्धिर्मानवजीवनस्य परमं लक्ष्यम्। पुरुषार्थ सिद्धयर्थं सन्मार्गानुसरणं करणीयम्। पुरुषार्थचतुश्टयेश्वर्थ

एवं असदाचरणं प्रति मानवं सर्वाधिकं प्रेरयति। अर्थाश्रितो कामः। धर्मार्थमप्यर्थस्यावश्यकता भवति। अर्थप्राप्त्यर्थं अन्यायाधर्मर्हिंसाचौ– र्याद्यनैतिकाचरणानि परित्यज्य धर्मानुकूलसदाचरणैर्धनोपार्जनं कर्त्तव्यम्।

*आचाराल्लभते ह्यायुराचारादीप्सिता प्रजाः।*
*आचाराद्धनमक्षय्यमाचारो हन्त्यलक्षणम्।।*[4]

सांसारिकजीवने प्रत्यक्षपरोक्षरूपेणार्थस्यातीवावश्यकता भवति। सुखस्य मूलं धर्मः। धर्मस्य मूलमर्थः।[5] आचार्यकौटिल्यः त्रिवर्गेश्वर्थं मुख्यम्मन्यमानः धर्मकाम मूलं स्वीकरोति– अर्थ एवं प्रधान इति। अर्थमूलौ हि धर्मकामौ।[6] वृत्तिमूलमर्थः।[7] अर्थः जीविकोपकरणम्।[8] जीवनोपयोगिसंसाधनार्थं अर्थस्यावश्यकता समुदेति। व्यासः महाभारते निगदति यत् अर्थाश्रितानि रोटि वस्त्रभवनानि। प्राणयात्रापि लोकस्य विना ह्यर्थं न सिद्धयति।[9] मनुः त्रिवर्गं श्रेयस्करं मनुते। धर्मार्थकामेष्वर्थस्यास्ति विशिष्टं महत्वम्।

*धर्मार्थादुच्यते श्रेयः कामार्थो धर्म एव च।*
*अर्थ एवेह वा श्रेयस्त्रिवर्ग इति तु स्थितिः।।* [10]

महाभारते वेदव्यासः धर्मानुष्ठानार्थमर्थस्यानिवार्यतां स्वीकरोति।[11]

*अर्थेन हि विहीनस्य पुरुषस्याल्पमेधसः।*
*विच्छिद्यन्ते क्रियाः सर्वा ग्रीष्मे कुसरितो यथा।।* [12]

पुरुषार्थचतुष्टयेषु परिगणितः प्रथमः – धर्मः मानवार्थं सन्मार्गं निर्दिशति। द्वितीयः – अर्थः सांसारिकसुखं प्रददाति। पुरुषार्थचतुष्टयेष्वर्थस्य परिगणनं धर्मानन्तरम्। इत्थं धर्मार्जनं धर्मानुकूलं भवितव्यम्। परित्यजेदर्थकामौ यौ स्यातां धर्मवर्जितौ।[13] श्रुतिवचनानि मनुमतमूलाधारं प्रतीयन्ते।

अस्मासु भद्रा द्रविणानिधत्त। विभूतिरस्तु सूनृता। प्रपतेत। पापि लक्ष्मि नश्येत। प्रामुत। पत। रमन्तां पुण्या लक्ष्मीर्याः पापीस्ता अनीनशम्।[14] श्रुतिस्मृतिसदृशं पुराणेष्वपि न्यायपूर्वकधर्मानुसारं धनोपार्जनस्य तस्योपयोगस्य चोपदेशो वर्तते।

*धर्मार्थकाममोक्षाख्यं य इच्छेच्छ्रेय आत्मनः।*
*एकमेव हरेस्तत्र कारणं पादसेवनम्।।* [15]

अत्र भागवतकारस्यायं अभिप्रायः अस्ति–मानवः मनसा वाचाकर्मणा भक्तिपूर्वकं भगवतः सेवां करिष्यति चेत्तस्य मनसि अनैतिकमार्गेण धनार्जनस्य वार्ताप्यसं भवा।

*मा राज्यश्रीरभूत् पुंसः श्रेयस्कामस्य मानद।*
*स्वजनानुत बन्धून् वा न पश्यति यथान्धहक्।।* [16]

उज्जयिन्याः कृपणार्थलोलुपब्राह्मणस्य कथा माध्यमेनोपदेशः प्रदीयते।

*स्तेयं हिंसानृतं दम्भः कामः क्रोधः स्मयो मदः।*
*भेदो वैरमविश्वासः संस्पर्धा व्यसनानि च।।*
*एते पञ्चदशानर्था ह्यर्थमूला मता नृणाम्।*

*तस्मादनर्थमर्थाख्यं श्रेयोऽर्थी दूरतस्त्यजेत् ।।*[17]

न्यायोचितरीत्या धनार्जनं कुर्वन् भगवत्परायणत्वं गृहस्थस्य परमकल्याणकरः मार्गः।

*अयं स्वस्त्ययनः पन्था द्विजातेर्गृहमेधिनः।*
*यच्छ्द्धयाऽऽप्रवित्तेन शुक्लेनेज्येत पूरुशः ।।*[18]

अभीशटं धनं किम्? प्रश्नस्यास्योत्तरे कृष्णस्य संदेशः यद्धर्म एव मनुष्यस्याभीष्टधनम्। धर्म इष्टं धनं नृणां यज्ञोऽहं भगवत्तमः।[19] अनेन प्रकटितं भवति यद्धर्माचरणपूर्वकमर्जितं धनमेव वास्तविकं धनं यत् मानवजीवनस्य परमलक्ष्यसिद्धौ सहायकः। अनेन स्पष्टमिदं यत् पुराणमपि श्रुतिसम्मत न्यायसम्मितोपार्जितं धनमेव श्रेयस्करमपि चैतद्विपरीतमन्यायाधर्मोपार्जितं धनं हेयं सिद्धयति। पुराणेषु धनस्यास्य धर्मानुकूल व्ययकरणेऽप्युपदेशोपलभते। यः धर्मानुसारमर्थस्योपभोगं न करोति तद्धनं व्यर्थमेव विनष्टं जायते। धनस्योपयोगः धर्मार्थं चेत् परलोकेऽपि निःश्रेयसहेतुः। तद्यथा–पुरुषस्य धनं यत्किञ्चिद्धर्मौपयिकं बहुकृच्छ्राधिगतं साक्षात्परमपुरुषाराधनलक्षणो योऽसौ धर्मस्तं तु साम्पराय उदाहरन्ति। तद्धर्म्यं धनं दर्शनस्पर्शन श्रवणा–स्वादनावघ्राणसंङ्कल्प व्यवसायगृहग्राम्योपभोगेन कुनाथस्या जितात्मनो यथा सार्थस्य विलुम्पन्ति। अथ च यत्र कौटुम्बिका दारापत्यादयो नाम्ना कर्मणा वृकसृगाला एवानिच्छतोऽपि कदर्यस्य कुटुम्बिन उरणकवत्संरक्ष्यमाणं मिषतोऽपि हरन्ति।[20] श्रीमद्भागवतपुराणेऽस्मिन् धर्मपूर्वकोपार्जित धनव्ययस्य प्रकारोप्युपदिष्टः। राजांशमायकरादिकं निस्सृत्यावशिष्टं धनं पञ्चभागेशु विभज्य मानवः लोकपरलोके सदा प्रसन्नतामधिगच्छति।

*धर्माय यशसेऽर्थाय कामाय स्वजनाय च।*
*पञ्चधा विभजन्वित्तमिहामुत्र च मोदते ।।*[21]

भागवतपुराणस्योपदेशेऽस्मिन् 'केवलाघो भवति केवलादी'। इति श्रुतिवचनस्य भाव अन्तर्निहितः। पुराणेऽस्मिन्नर्थसंचयप्रवृत्तेः पूँजीवादस्य वा निन्दा अस्ति।

*दिव्यं भौमं चान्तरिक्षं वित्तमच्युतनिर्मितम्।*
*तत् सर्वमुपभुञ्जान एतत् कुर्यात् स्वतो बुधः।।*
*यावद् भ्रियेत जठरं तावत् स्वत्वं हि देहिनाम्।*
*अधिक योऽभिमन्येत स स्तेनो दण्डमर्हति।।*[22]

आवश्यकतानुसारं रक्ष्यावशिष्टं धनं देशधर्मजातिसमाजसेवार्थं राष्ट्रस्योत्थानाय च प्रयोज्यम्। ईशावास्योपनिषदि उपदिशति ऋषिः तेन त्यक्तेन मुञ्जीथा मा गृधः कस्यस्विद्धनमिति। भागवतपुराणे योगीवश्रस्य चमसस्योक्तौ उपदिष्टं यद्धनस्यैकमात्रं फलमस्ति धर्मः। धर्मेणैव परमतत्त्वज्ञानं जायते।

*धनं च धर्मैकफलं यतो वै ज्ञानं सविज्ञानमनुप्रशान्ति।*
*गृहेशु युञ्जन्ति कलेवरस्य मृत्युं न पृयन्ति दुरन्तवीर्यम्।।*[23]

श्रीमद्भागवतमहापुराणे पदे पदे अनेकोपदेश वाक्यान्युपलभ्यन्ते यैर्ज्ञायते यदर्थं प्रत्यस्माकं प्रवृत्तिः सदा त्यागोन्मुखा एव। **'सर्वे गुणाः काञ्चनमाश्रयन्ति'** भर्तृहरेः वचनमिदं प्राचीनकाले कटाक्षरूपे व्यङ्ग्यरूपे वासीत्। परन्त्वद्य भौतिकवादस्य युगेऽस्य प्रभावृचरममस्ति। सर्वविद्यागुणवस्तूनां मूल्यमद्य धनेनैव गण्यते। अधर्मान्यायमा–श्रित्याप्यर्थोपार्जनं जीवनस्यैक मात्रं लक्ष्यं जातम्।

वर्तमानयुगेऽप्यर्थस्य कृतेऽधिक महत्त्वप्रदानं नोचितम्। निष्कर्षरूपेण गम्भीर्यपूर्वकं विचारयामः चेद्वयं स्वप्राचीनादर्शं वेदपुराणादिशास्त्रेषूपदिष्टमर्थार्जनं सम्यक् विज्ञाय समाजे विद्यमानामार्थिकविषमतां न्यूनीकर्तुं समर्थाः भवितुं शक्नुमः। अर्थस्य दुरुपयोगं दूरीकृत्य मानवकल्याणाय तस्य सदुपयोगं कर्त्तुं सक्षमाः भवेम।

**सन्दर्भ**

1. मनु० 6.92
2. भाग० 7.11.5, 7—12
3. कणाद—वैशेषिक सूत्र 1.1.2
4. मनु० 4.156
5. चाण० सूत्र 1.2
6. अर्थशास्त्र 1.70.10—11
7. चाण० सूत्र 90
8. कामन्दकनीति 5.62
9. महा० शान्ति० 8.17
10. मनु० 2.224
11. महा० शान्ति० 90.18
12. तदैव शान्ति० 8.18
13. मनु० 4.176
14. अथर्व० 7.82.1, तदैव 20.45.2, तदैव 7.115.1, 7.115.4
15. भाग० 4.8.41
16. तदैव 10.84.64
17. तदैव 11.23.18—19
18. तदैव 10.84.37
19. तदैव 11.19.39
20. तदैव 5.14.2—3
21. तदैव 8.19.37
22. तदैव 7.14.7—8
23. तदैव 11.5.12